# 17. छत्तीसगढराज्यस्य धार्मिकस्थलानि

छत्तीसगढराज्ये अनेकानि धार्मिकस्थानानि सन्ति। अभिलेखैः ज्ञायते यत् रायपुरं धार्मिकमहत्त्वस्य स्थलम् आसीत्। रायपुरनगरे अनेके देवालयाः विद्यन्ते। यथा दूधाधारी-शीतलामाता-महामाया-बूढेश्वर महादेव मन्दिराणि प्राचीनानि सन्ति । राजिमग्रामे कुलेश्वरमहादेवराजीवलोचनयोः द्वौ देवालयौ अति प्रसिद्धौ स्तः । गिरौधपुरीग्रामे सन्तगुरुघासीदासस्य सिद्धस्थलं दर्शनीयमस्ति।

बिलासपुरजिलान्तर्गतं रतनपुरे महामायामन्दिरं दर्शनीयं धार्मिकस्थलम् अस्ति । खल्लारीग्रामे पर्वतोपरि खल्लारी देवालयः अवस्थितः । अस्मिन् ग्रामे महाभारतस्य अनेकाः किंवदन्तीः प्रचलिताः सन्ति । कथ्यते यत् अस्य पर्वतोपरि भीमस्य पदचिह्नानि अङ्कितानि सन्ति । सिरपुरग्रामेऽपि लक्ष्मणकामगन्धर्वेश्वराणां देवालयाः वर्तन्ते । डोंगरगढे पर्वतोपरि स्थितो मातुः बम्लेश्वर्याः देवालयः न केवलं छत्तीसगढवासिनाम् अपितु सकलभारतवर्षस्य श्रद्धालूनां आकर्षणस्य केन्द्रम् अस्ति । अत्र प्रतिवर्षं मेलापकः आयोज्यते । शिवरीनारायणे अनेकानि प्राचीनानि दर्शनीयस्थलानि प्रतिष्ठितानि सन्ति । कथ्यते यत् अस्मिन् स्थाने भगवान् रामः शबर्याः उच्छिष्टानि बदरिकाणि अभक्षयत् । अस्य स्थलस्य समीपे खरोद्ग्रामे भगवतोः शङ्करलक्ष्मणयोः अति प्राचीनदेवालयौ विद्येते ।

धमतरीजिलायां कतिपये प्राचीनाः देवालयाः अपि सन्ति । येषु सर्वाधिकः लोकप्रियः बिलाईमातादेवालयः वर्तते । इयं माता अस्य क्षेत्रस्य रक्षां करोति इति मन्यते । दन्तेवाड़ा जिलायां दन्तेश्वरीदेवालयः अतिप्रसिद्धः । कवर्धाजिलायां भोरमदेव स्थाने भगवतः शिवस्य देवालयः दर्शनीयः मनोहरश्च । जांजगीरे नकटामंदिरं विष्णुमन्दिरञ्च अति प्राचीने स्तः । यदि वयं बिलासपुरनगरं गच्छामः तत्र तालाग्रामे देवरानीजेठानीदेवालयौ प्रसिद्धौ स्तः । दामाखेडाग्रामे कबीरपन्थीयानां प्रमुखतीर्थस्थलं तेषां प्राचीनकथा कथ्यन्ते । अस्मिन् क्षेत्रे एका जनश्रुतिः प्रचलिता यत्र भगवान् रामसीतालक्ष्मणाश्च वनवासकाले अवसन् । रायगढजिलायां नेतनगरान्तर्गतं जैनतीर्थानां चतुर्मुखीप्रतिमा प्राप्यते । छत्तीसगढराज्यस्य एतानि धार्मिकस्थलानि लोकश्रद्धां विभूषयन्तीति ।

## शब्दार्थाः

| | | |
|---|---|---|
| ज्ञायते | - | ज्ञात होता है । |
| देवालयः | - | मन्दिर |
| दर्शनीयम् | - | देखने योग्य |
| स्थलम् | - | स्थान |
| किम्वदन्तीः | - | जनश्रुतियाँ |
| बदरिकाणि | - | बेर |
| उच्छिष्टः | - | जूठे |
| अवशेषाः | - | खण्डहर |
| कन्दराणि | - | गुफाएँ |

## अभ्यासः

1. **निम्नाङ्कित प्रश्नों के उत्तर संस्कृत भाषा में दीजिए -**

क. महामाया मन्दिरे कस्याः प्रतिमा स्थापिता ?
ख. राजिमग्रामः कस्य हेतोः प्रसिद्धः ?
ग. गिरौधपुरी ग्रामे कस्य सिद्धस्थलं वर्तते ?
घ. भीष्मस्य पदचिह्नानि कुत्र अङ्कितानि सन्ति ?
ङ. कस्मिन् स्थाने प्रतिवर्षं मेलापकः आयोज्यते ?
च. दन्तेश्वरी-देवालयः कुत्र अवस्थितमस्ति ?
छ. कबीरपन्थीयानां तीर्थस्थलं कुत्र अस्ति ?

2. **निम्नलिखित शब्दों की सन्धि-विच्छेद कीजिए -**

बूढ़ेश्वरः, देवालयः, पर्वतोपरि, मनोहरः, गन्धर्वेश्वरः ।

3. **निम्नलिखित शब्दों का समास विग्रह कीजिए -**

राजीवलोचनम्, महामाया, महादेवः, पद्चिह्नानि

4. **धार्मिक शब्द में 'धर्म' मूलशब्द है । 'धर्म' में 'इक' प्रत्यय के योग से धार्मिक शब्द बना है । इसी प्रकार निम्नलिखित शब्दों में 'इक' प्रत्यय लगाकर नये शब्द बनाइए -**

समाज + इक = ..............................
इतिहास + इक = ..............................
परिवार + इक = ..............................
राजनीति + इक = ..............................
संस्कृति + इक = ..............................
नगर + इक = ..............................

PQYLHK

5. **निम्नलिखित प्रदत्त शब्दों से रिक्त स्थानों की पूर्ति कीजिए-**

मनोहराणि, उच्छिष्ठानि, बस्तरः, मेलापकः, दन्तेश्वरी, भीमस्य, दामाखेड़ा

क. अस्य पर्वतोपरि .................... पदचिह्नानि सन्ति ।
ख. अत्र प्रतिवर्षं ......................... आयोज्यते ।
ग. भगवान् रामः शबर्याः ..................... बदरिकाणि अभक्षयत्।
घ. सर्व धार्मिक-स्थलानि अतीव ............... सन्ति ।
ङ. बस्तर जिलायां ...................... देवालयः अतिप्रसिद्धमस्ति।
च. कबीरपन्थीयानां प्रमुख तीर्थस्थलं ...................... ग्रामे अवस्थितम् ।